✧˖°*❋ ❋*°˖✧

# दुर्गा कवचम्

# Durga Kavacham

✧˖°*❋ ❋*°˖✧

# ॥ दुर्गा कवचम् ॥

**ईश्वर उवाच ।**
श्रृणु देवि प्रवक्ष्यामि कवचं सर्वसिद्धिदम् ।
पठित्वा पाठयित्वा च नरो मुच्येत संकटात् ॥ 1 ॥

अज्ञात्वा कवचं देवि दुर्गामंत्रं च यो जपेत् ।
न चाप्नोति फलं तस्य परं च नरकं व्रजेत् ॥ 2 ॥

उमादेवी शिरः पातु ललाटे शूलधारिणी ।
चक्षुषी खेचरी पातु कर्णौ चत्वरवासिनी ॥ 3 ॥

सुगंधा नासिकं पातु वदनं सर्वधारिणी ।
जिह्वां च चंडिकादेवी ग्रीवां सौभद्रिका तथा ॥ 4 ॥

अशोकवासिनी चेतो द्वौ बाहू वज्रधारिणी ।
हृदयं ललितादेवी उदरं सिंहवाहिनी ॥ 5 ॥

कटिं भगवती देवी द्वावूरू विंध्यवासिनी ।
महाबला च जंघे द्वे पादौ भूतलवासिनी ॥ 6 ॥

एवं स्थिताऽसि देवि त्वं त्रैलोक्ये रक्षणात्मिका ।
रक्ष मां सर्वगात्रेषु दुर्गे देवि नमोऽस्तु ते ॥ 7 ॥

✧ₓ˙˙˙˙˙°*❋ ❋*°˙˙˙˙˙ₓ✧

Free download PDF of all types of mantra, stotram,vandana,arati: chalisapdf.net